विद्युद्दूतः vidyud-dūtaḥ

क्रमाङ्कः द्वितीयः वसुधैव कुटुम्बकम् १।७।२०१२

INTERNATIONAL ASSOCIATION of SANSKRIT STUDIES

Issue: Second अन्ताराष्ट्रियसंस्कृताध्ययनसमवायः 1|7|2012

## रामकरणशर्मविरचितानि पद्यानि

विद्युद्दूत त्वमसि गतिमान्नैव तत्रास्ति शङ्का
सन्देशं मे हर सुरसरित्तीरसंस्थस्य तूर्णम् ।
संस्कारो ऽहं सकलजगतो वाङ्मनःकायशोभः
सर्वो बन्धुर्मम भुवि जनो नास्ति कश्चिन्ममान्यः ॥१॥

वेदाः साङ्गाः स्मृतिजययुता वैद्यकं पाणिनिश्च
काव्यं योगो गणितविभवो दर्शनं वास्तुशास्त्रम् ।
छन्दःशास्त्रं ललितकलिका मोक्षकामार्थशास्त्रं
सौन्दर्याप्त्यै मतिगतिगिरां सर्वमेतन् ममाङ्के ॥२॥

नास्तिकास्तिकभावानामेषाम् एषा सुवाहिका ।
सार्वभौमी समत्वात्मा साऽस्ति संस्कृतभारती ॥३॥

सम्मान्याः सर्व एवैते भूतले तदुपासकाः ।
वर्धन्ताम् आयुषा स्वस्था यशसाऽभ्युदयैस्तथा ॥४॥

---

## योगेन् हन्नेदेन पञ्चादशविश्वसंस्कृतसम्मेलस्य समापनसत्त्रे भाषणम् ।

पञ्चदशं विश्वसंस्कृतसम्मेलनं समाप्तमेव । दिनषट्कं शोधपत्राणां श्रवणेन विनिर्णयेन च कालो ऽतीतो विद्युल्लतेव । यदस्मिन्वर्षे भरतवर्षस्य राजधान्यां सम्मेलनं समायोजयद्भिः समायोजकैः प्रधानमन्त्यामन्त्रितो ऽसीत्तदुपायकौशल्यं श्लाघ्यम् । विश्वमेव कुटुम्बकमिति राष्ट्रियसंस्कृतसंस्थानस्य न्यायेन विशेषतः पण्डिताः संस्कृताध्यापकाश् छात्त्राश्च लक्षिताः । संस्कृतसम्मेलनं वस्तुतः विश्वविस्तृतकुटुम्बस्य सम्मेलनमाभात् ।

मान्या सदस्पतयः विद्वांसः कवयश्च !
अनुगृहीतो ऽस्म्यत्रभवता राधवल्लभेन त्रिपाठ्युपाह्वयेनास्मिन् समापनमहोत्सवे किञ्चिद्वक्तुम् । यद्यप्यस्मिन् सदसि विदुषां कवीनां मध्ये ऽस्मादृर्थ्यानुभूतिरूर्ध्वबाहुवामनवद्दुर्वारा भवति तथाप्यस्य सम्मेलनस्य विन्यासं स्तोतुमिच्छामि । एवंविधमातिथ्यं शार्मण्यदेशे दुष्प्रापम् । प्रतिदिनमाह्निकक्रियातन्त्रोन्मुक्ता वयं भोजनोष्णपेयाद्यमृतोपबृंहिताः श्रोत्रपेयं विद्यारसं स्वीकर्तुमपारयाम । दिवसस्यावसाने शीतले निशीथे इन्द्रियद्वयानुभाव्यनाठ्यरसास्वादनमादातुम् अशक्नुम । पश्चिमदेशागतानां सदस्सदां स्थानीयः कृतज्ञतरो ऽस्मयेव ।
अस्मिन् पञ्चदशे विश्वसंस्कृतसम्मेलने षडाह्निकसत्त्राणां दर्शनं श्रवणं चानल्पं सुखमावाहयति स्म । पश्चिमानामपि पण्डितानामपश्चिमवैदुष्यं करतलीकृतं येन वादप्रतिवादमतभेदादि कश्चित् कालमिति सम्भावये शशविषाणतां गतम् । वेदवेदाङ्गाद्याधुनिकसंस्कृतसाहित्यपर्यन्तानां विषयरसाणां वैविध्ये ऽपि ते सर्वे क्रमेणैकरसात्मकं ज्ञानसागरमपूरयन्त । तदगस्त्यवदम्बुनिधिपाने ऽसमर्थाः श्रान्ता वयं विद्याभरादनुनिशीथकथनेन स्वप्नाभावाच्च ।

यद्येकैकं भवितृ विश्वसंस्कृतसम्मेलनं तावतीं परिनिष्ठामापादयति तत्साधु साधु इति वच्महे इति विरमामि ।

डा राबर्ट गोल्ड्मान्
यूनिवर्सिटि आव् कालिफोर्न्य

परमपूजनीये देहलीराष्ट्रप्रधानमन्त्रिणि श्रीमति शीलदीक्षितमहाभागे, राजदूत श्रीकरणसिंहमहोदय, राष्ट्रीयसंस्कृतसंस्थानकुलपते श्रीराधावल्लभत्रिपाठिमहाशय, मान्याः विद्वद्वराः।

अस्माकं सर्वेषामन्ताराष्ट्रीयाणां संस्कृताध्यायिनां कृते किमपि विज्ञापयाम्यहम् । पूर्वपश्चिमेभो नाना-प्रदेशेभ्य आगता देहलीनगरे ऽस्मिन्पञ्चदशविश्वसंस्कृतसम्मेलने सम्मिलिता वयं सर्वे ऽत्यर्थं विस्मिताः संतुष्टाः स्मः । वयं हि दिनषट्कमेव विद्यामृतसागरं पिबन्तो ऽप्यतृप्ता एव भवामः । अस्य सम्मेलनस्य समीचीनकार्यक्रमः समागतविदुषांश्च वेदादिनानाविषयेषु संशोधनपत्त्राण्यस्माकं विस्मयकारणं प्रमोद-कारणं च । राष्ट्रीयसंस्कृतसंस्थानस्य कुलपतिना राधावल्लभत्रिपाठिमहोदयेन स्वसहायकैः सह सर्वमभ्यधिकतया सुकारितं सुसमायोजितमेवासीत्।

सर्वेषामस्माकमातिथ्यमप्यनवद्यमेवासीत् । अतो ऽहं सर्वेषां सम्मेलने समागतानां विदुषां कृते ऽस्मद्धार्दिक्यकृतज्ञतां द्योतयितुमिच्छामि । भूयो भूयः सर्वसम्मेलनसमायोजितारः प्रति “धन्यवाद” इत्युक्त्वा विरामि विस्तरात्।।

इति पञ्चादशविश्वसंस्कृतसम्मेलस्य समापनसत्त्रे भाषणम् ।

इति विद्युद्दूतस्य द्वितीयाङ्कः

---